# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

with three Vaisnava commentaries

Version 0.1


edited, translated, and annotated

by

Toke Lindegaard Knudsen

assisted by Neal Delmonico



October 28, 2000

# Chapter 1

# सैन्यदर्शनम् (Viewing the Armies)

**धृतराष्ट्र उवाच**:
**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।**
**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१ ॥**

श्रीधरी (सुबोधिनी)

श्रीगणेशाय नमः
श्रीमज्जगद्गुरवे नमः
श्रीकृष्णाय नमः

शेषाशेषमुखव्याख्याचातुर्यं त्वेकवक्त्रतः ।
दधानमद्भुतं वन्दे परमानन्दमाधवम् ॥१ ॥

श्रीमाधवं प्रणम्योमाधवं विश्वेशमादरात् ।
तद्भक्तियन्त्रितः कुर्वे गीताव्याख्यां सुबोधिनीम् ॥२ ॥

भाष्यकारमतं सम्यक् तद्व्याख्यातृगिरस्तथा ।
यथामति समालोड्य गीताव्याख्यां समारभे ॥३ ॥

गीता व्याख्यायते यस्याः पाठमात्रादयत्नतः ।
सेयं सुबोधिनीटीका सदा ध्येया मनीषिभिः ॥ ४ ॥

इह खलु सकललोकहितावतारः सकलवन्दितचरणः परमकारुणिको भगवान् देवकीनन्दनस्तत्त्वज्ञानविजृम्भितशोकमोहविभ्रंशितविवेकतया निजधर्मत्यागपरधर्माभिसन्धिपरमर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार । तमेव भगवदुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबन्ध । तत्र च प्रायशः श्रीकृष्णमुखान्निःसृतानेव श्लोकानलिखत् कांश्चित्तत्सङ्गतये स्वयं व्यरचयद्यथोक्तं गीतामाहात्म्ये:

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तारैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥

इति निरूप्यते – धर्मक्षेत्र इति । भोः सञ्जय धर्मभूमौ कुरुक्षेत्रे मत्पुत्राः पाण्डुपुत्राश्च युयुत्सवः योद्धुमिच्छन्तः समवेताः मिलिताः सन्तः किं कृतवन्तः ॥ १ ॥

## सञ्जय उवाच:

## दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
## आचार्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥ २ ॥

**श्रीधर**: दृष्ट्वेति । पाण्डवानामनीकं सैन्यं व्यूढं व्यूहरचनया व्यवस्थितं दृष्ट्वा द्रोणाचार्यसमीपं गत्वा राजा दुर्योधनो वक्ष्यमाणं वाक्यमुवाच ॥ २ ॥

## पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
## व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

**श्रीधर**: तदेव वाक्यमाह – पश्यैतामित्यादिनवभिः श्लोकैः । भो आचार्य पाण्डवानां विततां चमूं सेनां पश्य । द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां व्यूहरचनया अधिष्ठिताम् ॥ ३ ॥

## अत्र शूरा महेष्वासा भीमार्जुनसमा ।
## युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

**श्रीधर**: अत्रास्यां चम्वामिष्वो बाणा अस्यन्ते क्षिप्यन्ते एभिरिति इष्वासाः धनूंषि महान्त इष्वासा येषां ते तथा ।भीमार्जुनौ तावदत्रातिप्रसिद्धौ योद्धारौ ताभ्यां समाः शूराः शौर्येण क्षात्रधर्मेण उपेताः सन्ति तानेव नामभिर्निर्दिशति । युयुधानः सात्यकिः ॥ ४ ॥

## धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
## पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥ ५ ॥

**श्रीधर**: धृष्टकेतुरिति । चेकितानो नाम एको राजा । नरपुङ्गवः नरश्रेष्ठः शैब्यः ॥ ५ ॥

## युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
## सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

**श्रीधर**: युधामन्युश्चेति । विक्रान्तो युधामन्युर्नामैकः सौभद्रोऽभिमन्युः द्रौपदेया द्रौपद्यां पञ्चभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविन्ध्यादयः पञ्च । महारथादीनां लक्षणम्:

एको दशसहस्राणि योधयेद्यस्तु धिन्वनाम् ।
शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः ॥
अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः ।
रथी त्वेकेन यो युद्धयेत्तन्न्यूनोऽर्धरथी मतः

इति ॥ ६ ॥

## अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
## नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥

**श्रीधर**ः अस्माकमिति । निबोध बुध्यस्व नायकाः नेतारः संज्ञार्थं सम्यग्ज्ञानार्थमित्यर्थः ॥ ७ ॥

## भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
## अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ ८ ॥

**श्रीधर**ः तानेवाह भवानिति द्वाभ्याम् । भवान्द्रोणः समितिं सङ्ग्रामं जयतीति तथा । सौमदत्तिः सोमदत्तस्य पुत्रो भूरिश्रवाः ॥ ८ ॥

## अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
## नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

**श्रीधर**ः अन्ये चेति । मदर्थे मत्प्रयोजनार्थं त्यक्तुमध्यवसिता इत्यर्थः । नाना अनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदाः निपुणा इत्यर्थः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥१० ॥

**श्रीधर**: ततः किमित्यत आह अपर्याप्तमिति ।तत् तथाभूतैर्वीरैर्युक्तमपि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यमपर्याप्तं तैः सह योद्धुमसमर्थं भाति । इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षितं सत् पर्याप्तं समर्थं भाति ।भीष्मस्योभयपक्षपातित्वात् ।अस्मद्बलं पाण्डवसैन्यं प्रत्यसमर्थम् ।भीमस्यैकपक्षपातित्वात् ॥१० ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥११ ॥

**श्रीधर**: तस्माद् भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति । अयनेषु व्यूहप्रवेशमार्गेषु यथाभागं विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिताः सन्तः सर्वे भीष्ममेवाभितो रक्षन्तु यथाऽन्यैर्युध्यमानः पृष्टतः कैश्चिन्न हन्येत तथा रक्षन्तु । भीष्मबलेनैवास्माकं जीवितमिति भावः ॥११ ॥

तस्य सञ्जनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१२ ॥

**श्रीधर**: तदेवं बहुमानयुक्तं राज्ञो दुर्योधनस्य वाक्यं श्रुत्वा भीष्मः किं कृतवांस्तदाह तस्येति ।तस्य राज्ञः हर्षं सञ्जनयन् कुर्वन् पितामहो भीष्म उच्चैः महान्तं सिंहनादं कृत्वा शङ्खं दध्मौ वादितवान् ॥१२ ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३ ॥

**श्रीधरः** तदेवं सेनापतेः भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतो युद्धोत्स्वः प्रवृत्त इत्याह – तत इति । पणवाः आनकाः गोमुखाश्च वाद्यविशेषाः सहसाइव तत्क्षणमेवाभ्यहन्यन्त वादिताः । स च शङ्खादिशब्दस्तुमुलो महानभवत् ॥ १३ ॥

**ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।**
**माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥ १४ ॥**

**श्रीधरः** ततः पाण्डवसैन्ये प्रवृत्तं युद्धोत्सवमाह – तत इति पञ्चभिः । ततः कौरवसैन्यवाद्यकोलाहलानन्तरं स्यन्दने रथे स्थितौ सन्तौ कृष्णार्जुनौ दिव्यौ शङ्खौ प्रकर्षेण दध्मतुः वादयामासतुः ॥ १४ ॥

**पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।**
**पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥ १५ ॥**
**अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।**
**नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥**

**श्रीधरः** तदेवं विभागेन दर्शयन्नाह – पाञ्चजन्यमिति । पाञ्चजन्यादीनि श्रीकृष्णादिशङ्खानां नामानि । भीमं घोरं कर्म यस्य सः । वृकोदरं यस्य स वृकोदरो महाशङ्खं पौण्ड्रं दध्माविति ॥ १५ ॥ अनन्तविजयमिति नकुलः सुघोषं नाम शङ्खं दध्मौ । सहदेवो मणिपुष्पकं नाम ॥ १६ ॥